2026

MASSC 203

# संसकृतालङ्कारशास्त्रम्- २

## Full Marks : 80
## Time : 3 Hours

*(The figures in the margin indicate full marks for the questions)*

अधस्तनानां लघूत्तराणि प्रदेयानि- 1x10=10

1. काव्यादर्शस्य रचयिता कः ?
2. काव्यादर्शे कति परिच्छेदाः वर्तन्ते ?
3. काव्यादर्शे वर्णितं गद्यकाव्यस्य लक्षणं किम् ?
4. वक्रोक्तिजीवितग्रन्थे अध्यायाःकेन नाम्ना ज्ञायन्ते ?
5. कुन्तकः वक्रोक्तेः कति भेदान् स्वीकरोति ?
6. कुन्तकमते काव्ये शब्दः कीदृशो भवेत् ?
7. ग्रन्थारम्भे कुन्तकेन कस्याः देवतायाः स्तुतिर्विधीयते ?
8. साहित्यदर्पणस्य नवमपरिच्छेदस्य नाम किम् ?
9. रुद्रटः वैदर्भ्याः किमाह लक्षणम् ?
10. लाटीरीतेः किं लक्षणम् ?

यथानिर्देशं समाधेयम्- (पञ्चप्रश्नाः) 6×5=30

11. तदत्यमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
    स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ (व्याख्या विधेया)
12. तत् कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता ।
    अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ (व्याख्या विधेया)
13. वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् ।
    देवीं सुक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम् ॥ (व्याख्या विधेया)
14. धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
    काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ॥ (व्याख्या विधेया)
15. कुन्तकप्रदत्तं काव्यलक्षणं व्याख्यायताम् ।
16. गौडीरीतिः(टिप्पणी देया)
17. विश्वनाथकविराजः (टिप्पणी देया)

निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् - 10×4=40

18. काव्यादर्शानुसारेण महाकाव्यस्य स्वरूपादिकं निरूपयत।
19. दण्ड्यानुसारेण काव्यकारणानि निरूपयत।
20. कुन्तकस्य संक्षिप्तपरिचयं प्रदाय वक्रोक्तिजीवितग्रन्थस्य अनुबन्धचतुष्टयं विविच्यताम्।
21. षड्वक्रोक्तिभेदान् उल्लिख्य पदपूर्वार्धवक्रोक्ते उपभेदाः सोदाहरणमुपस्थापनीयाः।
22. रीतिनियतानां रचनादीनां व्यक्तिः कथं भवति सोदाहरणं प्रतिपादयत।
23. साहित्यदर्पणस्य संक्षिप्तपरिचयं प्रदाय वैदर्भीरीतिरालोचनीया।

****